# संस्कृतवार्ता:

## दिनाङ्क:- 03.09.2025

## प्रात: - 06:55

**पीएम सीईओ गोलमेज :**

प्रधानमन्त्री श्रीनरेन्द्र-मोदी अद्य नवदिल्लीनगरे ऐषमः सेमीकान् इण्डिया इत्यस्य सी.ई.ओ. गोलोत्पीठिका-समारोहे भागं गृहीष्यति। भारतस्य सेमिकण्डक्टर्-पारिस्थितिकीतन्त्रस्य, तस्य विकासस्य च विषये चर्चां कर्तुं उद्यम-नेतारः अस्मिन् समारोहे एकत्रिताः भविष्यन्ति । गोलोत्पीठिका-समारोहे श्रीमोदी विश्वस्य मुख्यकार्यकारीभिः सह संवादं करिष्यति । अवधेयं यत् ह्यः एव श्रीमोदिना नवदिल्ल्याः यशोभूम्यां त्रि-दिवसीयस्य ऐषमः सेमीकन् इण्डिया इत्यस्य सम्मेलनस्य उद्घाटनं कृतम् । अस्य सम्मेलनस्य उद्देश्यं वैश्विक-सेमिकण्डक्टर्-आपूर्ति-शृङ्खलायां विश्वसनीय-सहभागि-रूपेण भारतस्य स्थापनम् अस्ति । अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् विश्वं भारते विश्वसिति । सहैव भारतेन सह सेमीकंडक्टर-क्षेत्रे भविष्यनिर्माणार्थमपि औत्सुक्यमावहति। श्रीमोदिना प्रोक्तं यत् तद्दिनं नातिदूरं अस्ति, यदा भारतस्य लघुतम-चिप्-यन्त्रं जगति महत्परिवर्तनं आनेष्यति ।

**वैष्णव - सेमिकण्डक्टर्::**

भारतस्य सेमिकण्डक्टर्-यात्रा ऐतिहासिकं स्तरं प्राप्ता वर्तते यतः पायलट् लाइनतः मेड-इन्-इण्डिया चिप्स् इत्यस्य प्रथमः समूहः प्रधानमन्त्री नरेन्द्रमोदिने समर्पितः । इलेक्ट्रॉनिक्स तथा सूचना प्रौद्योगिकी मन्त्री अश्विनी वैष्णवः ह्यः नवदिल्लीनगरे ऐषमः सेमीकान् इण्डिया इत्यस्य समारोहस्य प्रथमदिने प्रधानमन्त्रिणे एतानि चिप्स् संयन्त्राणि प्रदत्तवान् । श्रीअश्विनी वैष्णवः कार्यक्रमं सम्बोधयन् प्रोक्तवान् यत् भारतेन सेमीकंडक्टर-अभियानस्य आरम्भानन्तरं सम्पूर्णविश्वं विश्वासेन सह भारतम् अवलोकते ।

**जीएसटी परिषद सभा :**

जी.एस.टी. परिषदः षट्पञ्चाशत्तमा संगोष्ठी नवदिल्ल्याम् अद्यारभ्य आयोज्यते। केन्द्रीय वित्तमन्त्री निर्मला सीतारामन्वर्या अस्याः द्विदिवसीयसभायाः अध्यक्षतां करिष्यति । इयं परिषत् भारतस्य अग्रिम-वंशश्रेणिक जी.एस.टी. परिष्कार-विषये विचारं करिष्यति, यत्र आयकर-मूल्यस्य युक्तिकरणं, अनुपालनस्य सरलीकरणं च समाविष्टम् अस्ति। अवधेयं वर्तते यत् इतः पूर्वं प्रधानमन्त्री नरेन्द्रमोदी अस्मिन् वर्षे स्वातन्त्र्यदिवसस्य सम्बोधने वस्तु-सेवा-करेण, राष्ट्रस्य कथं लाभः अभवत् इति प्रकाशितवान् आसीत् । श्रीमोदी जीएसटी-अन्तर्गतं अग्रिम-वंशश्रेणिक-परिष्कारस्य महत्त्वं बोधितवान् आसीत्, येन सामान्यजनस्य कृते आयकरेषु न्यूनता वा भविष्यति।

**सीतारामन् सिंगापुर पीएम::**

केन्द्रीयवित्त-निगमकार्याणां च मन्त्री निर्मला सीतारामन् ह्यः नवदिल्लीनगरे सिङ्गापुरस्य प्रधानमन्त्री लॉरेन्स वोङ्ग इत्यनेन सह मिलितवती । चर्चाः व्यापारस्य,निवेशस्य, फिन्टेक्, कौशलविकासस्य, स्थायित्वस्य, स्वास्थ्यसेवायाः, संपर्कस्य च प्रमुखक्षेत्रेषु व्यापक-रणनीतिक-सहयोगस्य सुदृढीकरणे केन्द्रीकृताः आसन् । संगोष्ठ्याम् अस्याम् द्वयोः पक्षयोः एतेषु उपर्युक्त-क्षेत्रेषु सहकार्यं अधिकं गभीरं कर्तुं सहमतिः अभवत् । सिङ्गापुरस्य प्रधानमन्त्री लॉरेन्स वोङ्गः प्रधानमन्त्री नरेन्द्रमोदिनः आमन्त्रणेन भारतस्य त्रिदिवसीययात्रायां वर्तते । श्वः द्वयोः नेतारयोः द्विपक्षीयविमर्शः निश्चितः वर्तते। अवसरेऽस्मिन् सिङ्गापुरस्य प्रधानमन्त्री राष्ट्रपतिद्रौपदी-मुर्मूना सहापि मिलिष्यति ।

**गडकरी-शिखर**

मार्ग-परिवहन-राजमार्गमन्त्री नितिनगडकरी इत्यनेन उक्तम्, यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना सप्तत्यधिक-द्विसहस्रतम-वर्षपर्यन्तं भारतं कार्बन-तटस्थं देशं कर्तुं लक्ष्यं निर्धारितम् अस्ति । नवदिल्लीनगरे विंशतितमे वैश्विक-स्थायित्व-शिखर-सम्मेलनं सम्बोधयन् गडकरीमहोदयः अवदत् यत् जलवायुपरिवर्तनं वैश्विकतापश्च भविष्यस्य कृते बहुमारकाः वर्तन्ते ।

**शतरंज – फीडे ग्राण्ड् स्विस्:**

अद्य उज्बेकिस्तानस्य समरकण्ड्-नगरे प्रतिष्ठित ऐषमः एफ्.आई.डि.ई. ग्राण्ड् स्विस् (FIDE Grand Swiss 2025) इति शतरंज-प्रतिस्पर्धा आरभ्यते। इयं स्पर्धा सेप्टेम्बर् पंचदश-पर्यन्तं प्रचलति, अथ विश्वशतरंजस्य महत्त्वपूर्णेषु आयोजनेषु अन्यतमा अस्ति । अस्यां प्रतियोगितायाम् भारतस्य आर्. प्रग्यानन्द, डि. गुकेशेन सह अन्ये शतरंजक्रीडकाः क्रीडिकाश्च भागं ग्रहीष्यन्ति ।

**।।इति वार्ता:।।**